International Journal of Advanced Academic Studies 2020; 2(1): 140-141




**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
**Impact Factor:** RJIF 5.12
IJAAS 2020; 2(1): 140-141
Received: 13-11-2019
Accepted: 15-12-2019

**डॉ. गोविन्द नाथ चौधरी**
सहायक प्राध्यापक (अतिथि),
राजकीय संस्कृत महाविद्यालय,
भागलपुर,, दरभंगा, बिहार,
भारत

**Corresponding Author:**
**डॉ. गोविन्द नाथ चौधरी**
सहायक प्राध्यापक (अतिथि),
राजकीय संस्कृत महाविद्यालय,
भागलपुर, दरभंगा, बिहार,
भारत

# सम्प्रदानापादानयोः कारकत्वसिद्धयेऽवान्तरव्यापारः दाधातोः प्रयोगरहस्यं च

**डॉ. गोविन्द नाथ चौधरी**

**प्रस्तावना**

**'कर्ता कर्म च करणं च सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्।।**
**तादर्थ्ये सम्प्रदाने च चतुर्थी स्याच्च सर्वदा।**
**अधिकरणनिमित्तसत्वे सप्तमी स्यात् विषयेऽपि [1]।।**

तत्र 'वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः [2] इति भट्टोजिदीक्षितवचन– प्रामाण्यात्, 'तत्र वाक्यस्फोटो मुख्यः, तस्यैव लोकेऽर्थबोधजनकत्वात् तेनैवार्थसमाप्तेश्चेति [3] इति नागेशभट्टवचनप्रामाण्याच्च वाक्यस्यैव प्रधान्यम्। वाक्यं च सर्वमपि कारकेणानुविद्धमेवानुभूयते। तत्रेयं जिज्ञासा समुत्पद्यते यत् प्रधानव्यापारस्य सम्पादनाय अधिकरणादीनां यथा स्व–स्व अवान्तर–व्यापाराः अपि भवन्ति तथा सम्प्रदानापादानयोः स्वकीयावान्तरव्यापारा नानुभूयन्ते, अतः अन्वर्थत्व आश्रयणे सम्प्रदानापादनयोः कारकत्वं कथं सिद्धयति?
एतस्य प्रश्नस्य समाधानं 'कारके' [4] इति सूत्रस्थ भाष्ये 'अपादानादीनां त्वप्रसिद्धिः' [5] इति वार्तिकस्य व्याख्याने कैयटेन– 'अपादानस्याप्यवधिभावेनावस्थानरूपो व्यापारोऽस्ति, सम्प्रदानस्याप्यनुमानादिलक्षणः प्रतीयमानोऽपि व्यापारः कारकव्यपदेशनिबन्धनम्। यथा– प्रविश पिण्डीमिति' [6] इति ग्रन्थेन कृतं विद्यते। कैयटस्य अनुसारेण 'ध्रुवमपायेऽपादानम्' [7] इति सूत्रेण अपाये अवधिभूतस्य अपादानसंज्ञा विधीयते। यथा– 'वृक्षात् पत्रं पतति' इत्यत्र पत्रस्य वृक्षाद् अपायो (विश्लेषो, विभागो वा) भवति, तत्र वृक्षस्य अस्तित्वम् आवश्यकं भवति। वृक्षस्या असत्त्वभूते वाक्ये कर्तृत्वेन गृहीतस्य पत्रस्य पतनरूपव्यापार एव न भवितुमर्हति। अतः पत्रस्य पतनरूपव्यापारसम्पादनाय अवधिभावेन वृक्षस्य अवस्थितिरावश्यकी। एवंहि वृक्षस्य अवधिभावेन अवस्थितिरूपो यो व्यापारः, तस्य आश्रयत्वेन वृक्षस्यापि कारकत्वं सिद्धयति।
एवमेव सम्प्रदानेऽपि कारकत्वमित्थं सिद्धयति– यस्मै किंचिद् दीयते तस्य अनुमतिं (भवान् एतद् ददातु, अहं तद् ग्रहीष्यामि, एतादृशीं सहमतिम्) विना दानव्यापार एव न सम्पद्येत, यतो हि दानस्य यत् कर्म तेन सह ग्रहीतुः भोक्तृत्वेन सम्बन्धो भवेत्, इति विचार्य एव कश्चित् किंचिद् दीयते। एवंहि दानव्यापारस्य सम्पादनाय ग्रहीतुः अनुमतिरूपव्यापारः, प्रेरणारूपव्यापारः, अनिराकरणरूपात्मको वा व्यापारः पूर्वकाले आवश्यको भवति। एवंहि अनुमतिप्रेरणा अनिराकरण–रूपव्यापाराश्रयत्वेन सम्प्रदानस्यापि कारकत्वं सिद्धयति। अत्रैकः प्रश्नः समुदेति यद् यस्मै दीयते तस्य सन्निधाने स्थिते तत्र तु सम्प्रदानस्य अनुमत्यादिव्यापारः सम्भवति, यदा तु सोऽसन्निहितः। यथा– 'सूर्याय अर्घ्यं ददाति' इत्यादौ, तदा अनुमत्यादिव्यापाराभावात् तस्य सम्प्रदानस्य कथं कारकत्वम्? अस्य प्रश्नस्य समाधाने 'कारके' इति सूत्रे लघुशब्देन्दुशेखरे नागेशेनोक्तं यद् 'असन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकेन स्वज्ञानपूर्वकालत्वेनैव जनकत्वम्' [8] इति। तेन स्पष्टं भवति यद् असन्निहितस्य सम्प्रदानस्य सामीप्याभावेऽपि दातुः बुद्धौ स स्थितो भवति, अर्थात् दाता मन्यते यद् ग्रहीता दानाय अनुमतिं प्रादादिति। सम्प्रदानेऽपि अवान्तरव्यापारो भवति, वाक्यपदीयस्य निम्नलिखितकारिकया अपि प्रमाणितं भवति– [9]

**'अनिराकरणात्कर्तुः त्यागाङ्गं कर्मणेप्सितम्।**
**प्रेरणानुमतिभ्यां च लभते सम्प्रदानताम्।।'**

अस्याः कारिकाया अयमर्थः– कर्तुः इति पदे कर्मणि षष्ठी, तस्य च अनिराकरणात्, प्रेरणानुमतिभ्यामिति पदद्वयेन सहान्वयः। त्यागः= दानम् अङ्गं यस्य तत् त्यागाङ्गम् इति पदं कर्मणा यदीप्सितमिति पदसमूहस्य विशेषणम्, कर्मणा यदीप्सितमित्यस्य यत् कर्मणा सम्बन्धुमिष्टम् इत्यर्थः, अर्थाद् दानस्य कर्मणा यं सम्बन्धुमिच्छति कर्ता, तत् त्रिभिः प्रकारैः सम्प्रदानतां लभते। तद्यथा–.

1. **कर्तुः अनिराकरणात्–**अर्थात् यः दानकर्ता, तं दातुं न निषेधति दानग्रहीतेत्यर्थः। अस्योदाहरणम्–'सूर्यायार्घ्यं ददाति'। अत्र दानाय सूर्यः न प्रार्थयते, नानुमन्यते, न च निराकरोति।

2. **कर्तुः प्रेरणायाः–** प्रेरणाया इत्यत्र हेतौ पञ्चमी। अर्थात् यः दानकर्ता, तं दातुं प्रेरयति दानग्रहीता, अन्यो वा यद् दानेन पुण्यं भवति, अतः भवता दानमवश्यं करणीयमिति, येन प्रेरितो भूत्वा दाता ददाति। अस्योदाहरणम्– 'विप्राय गां ददाति'।

3. **कर्तुः अनुमतेः–** अनुमतेः इत्यत्रापि हेतौ पञ्चमी। अर्थात् यः दानकर्ता, तस्मै दानं कर्तुम् अनुमतिं ददाति, अनुमतो भूत्वा दाता ददाति। अस्योदाहरणम्– 'उपाध्यायः गां ददाति'।

एवं हि सम्प्रदानापादानयोरपि कारकत्वं सिद्ध्यति।
तत्रापि च कारकाणां कर्त्रादिषु षट्सु कर्तृशब्दे, कर्मशब्दे, करणशब्दे, अधिकरणशब्दे च सामान्यरूपेण कृधातोः प्रयोगे, सम्प्रदानापादानयोस्तु दाधातोः प्रयोगे एतद्धि रहस्यं निहितमस्ति यद् यासु विशेषसंज्ञासु कृधातोः प्रयोगः तेषामेव तदीयव्यापाराणां स्वातन्त्र्यरूपेण विवक्षामाश्रित्य तेषु कर्तृत्वं सम्भवति, न तु तद्भिन्नयोः सम्प्रदानापादानयोरपि।
तेन करणादीनां कर्तृत्वविवक्षया यथा– 'असिना छिनत्ति' इत्यस्य स्थाने 'असिः छिनत्ति' इति, 'स्थाल्यां पचति' इत्यस्य स्थाने 'स्थाली पचति' इति, 'तण्डुलं पचति' इत्यस्य स्थाने 'तण्डुलः पच्यते' इति च प्रयोगोऽपि भवति तथा 'विप्राय ददाति' इत्यस्य स्थाने 'विप्रः ददाति', 'ग्रामादागच्छति' इत्यस्य स्थाने 'ग्रामः आयाति' इति प्रयोगो न भवति। अर्थात् सम्प्रदानापादानयोः कर्तृत्वेन विवक्षा न भवति। अस्यैव रहस्यस्योद्घाटनं हेलाराजेन– [10]

**'निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके।**
**व्यापारभेदापेक्षायां करणत्वादिसम्भवः।।'**

इति कारिकायाः व्याख्यानक्रमे– 'सम्प्रदानापादानयोः स्वव्यापारे स्वातन्त्र्यविवक्षा नास्ति। द्वितीयस्य दातुरपगन्तुश्चापेक्षणात्' [11] इति पङ्क्त्या कृतम्।
हेलाराजस्य पङ्क्तेरयमाशयः– कर्म–करणाधिकरणानां कर्तृत्वविवक्षायां द्वितीयस्य कस्यापि कर्तुः अपेक्षा न भवति, अतः 'तण्डुलः पच्यते', 'असिः छिनत्ति', 'स्थाली पचति' इत्यादिषु प्रयोगेषु कदाचिदपि देवदत्तादीनां प्रयोगो न दृश्यते। सम्प्रदानापादानयोस्तु यः अवान्तरव्यापारः तस्य कृते सततं द्वितीयस्यापि कर्तुः अर्थाद् दातुः, अपगन्तुश्चापि (विभागस्य कर्तुः पत्रादेः) अपेक्षा भवति। अतएव सम्प्रदानापादानयोः कदापि कर्तृत्वविवक्षा न भवति।
यद्यपि 'कारके' इति सूत्रे भाष्ये एव 'बलाहकाद् विद्योतते विद्युत्' [12] इत्यस्य स्थाने 'बलाहके विद्योतते', 'बलाहको विद्योतते' इति उदाहरणाभ्यां प्रतीयते यद् विवक्षानुसारेण कदाचिदपादानस्यापि कर्तृरूपेण प्रयोगो भवति, तथापि अत्रत्य कैयटस्य 'बलाहकादिति। निःसरणाङ्गे विद्योतने द्युतिर्वर्तते, पृथग्भावश्च विवक्षितः। बलाहक इति। स्थित्यङ्गे द्योतनेऽत्र द्युतिर्वर्तते। बलाहके स्थित्वा ज्योतीरूपा विद्युद् विद्योतत इत्यर्थः। बलाहक इति। 'धूमज्योतिः सलिलमरुतां संघातस्य मेधपदार्थत्वविवक्षायामिति भावः [13]। इत्येवं व्याख्यानुसारेण द्युत [14] धातोरर्थस्य परिवर्तनेनैव एतत्सम्भवं भवति। तद्यथा– 'बलाहकाद् विद्योतते विद्युत्' इत्यत्र द्युत् धातोः निःसरणपूर्वकपृथग्भावानुकूलविद्योतनात्मको व्यापारः इत्यर्थः, 'बलाहके विद्योतते विद्युत्' इत्यत्र च स्थितिपूर्वकविद्योतनानुकूलो व्यापारः इत्यर्थः, 'बलाहको विद्योतते' इति प्रयोगश्च विद्युतः, धूमज्योतिः सलिलमरुतां संघातस्य मेघस्य च अभेदविवक्षायां भवति।
एवं हि धातोः भिन्नमर्थं स्वीकृत्य, अवयवभूताया विद्युतः. अवयविभूतस्य बलाहकस्य च अभेदमाश्रित्यैव अपादानस्यापि कर्तृरूपेण प्रयोगः कर्तुं शक्यते।
एवमेव अवयवावयविनोरभेदमाश्रित्य 'वृक्षात् पत्रं पतति' इत्यस्य स्थाने 'वृक्षः पतति', 'ग्रामाद् जनाः आगच्छन्ति' इत्यस्य स्थाने 'ग्रामः आगच्छति' इत्यपि प्रयोगो भवितुमर्हति, किन्तु अर्थः तादृशो न भविष्यति, यादृशोऽर्थः अपादानरूपेण तस्य वाक्ये स्थितौ सत्यां भवति स्म।

अतएव अत्रैव अग्रे कैयटेन उक्तं यद्–[15] 'ग्राम आगच्छतीत्यर्थान्तरावगमाद् अपादानव्यापारानवसायात् प्रयोगाभावः। एवं 'ब्राह्मणाय ददाती'त्यर्थे 'ब्राह्मणो ददाति' इति प्रयोगाभावः' इति शम्।

**सन्दर्भ सूचीः**


1. लघुसिद्धान्तकौमुदी, परिशिष्टम्, पृ.–297–98
2. वैयाकरणभूषणकारिका–61
3. परमलघुमंजूषा, पृ.–6
4. अष्टाध्यायी–1.4.23
5. महाभाष्यम्–1.4.23
6. प्रदीपः (महाभाष्यम्.)–1.4.23
7. अष्टाध्यायी–1.4.24
8. लघुशब्देन्दुशेखरः, कारकप्रकरणम्– 'कारके' इति सूत्रे
9. वाक्यपदीयम्, साधनसमुद्देशः, कारिका–129
10. वाक्यपदीयम्, साधनसमुद्देशः, कारिका–18
11. वाक्यपदीयम्, साधनसमुद्देशः, कारिका–18, व्याख्याने
12. महाभाष्यम्–1.4.23
13. पूर्वमेघः–5
14. वैयाकरणसिद्धान्तकौमुदी, धातु सं.–741
15. प्रदीपः (महाभाष्यम्.)–1.4.23